स्तोत्राण्यग्निष्टोम” इत्यादिना सप्रपञ्चं दर्शितः। अग्निष्टोम शब्दस्य व्युत्पत्तिर्भाष्यकृता सायणाचार्य्येण दर्शिता यथा “यज्ञायज्ञीय इत्यस्यामाग्नेय्यामुत्पन्नेन अग्नेष्टोमसाम्ना समाप्तेरग्निष्टोम इतिनाम सम्पन्नमिति”। तद्विधानपरिपाटी च बौधायनीये केशवस्वामिना दर्शिता तत एव साऽवगन्तव्या। ताण्ड्ये षष्ठाध्याये च “अग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणी”त्युक्त्वा अष्टमाध्यायपर्य्यन्तं यानि स्तोत्राणि शस्त्राणि वा प्रयोज्यानि तान्यभिहितानि तानि च तत एवावगन्तव्यानि तेषां स्वरूपादि तत्तच्छब्दार्थे वक्ष्यते तत्र अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रं प्रगीतमन्त्रसाध्या तु स्तोत्रमिति तयोर्भेदः। एकाहसाध्ये अग्निष्टुन्नामके यज्ञे च तत् प्रमाणम् अग्निष्टुच्छब्दे। अग्निष्टोमस्य व्याख्यानः कल्पः ठक्। आग्निष्टोमिकः अग्निष्टोमबोधककल्पे।

**अग्निष्टोमसाम** न० अग्निष्टोमे अवसाने विहितं साम गानविशेषः। अग्निष्टोमयज्ञसमापके तृतीयसवने विहिते “यज्ञायज्ञीय” इत्यस्यामाग्नेय्यामृचि गीयमाने सामवेदे “प्रकृतौ (अग्निष्टोमे) तृतीयसवने आर्भवपवमानस्तोपरि यज्ञायज्ञीयं साम गीयते तेन च साम्ना अग्निष्टोमस्य समाप्यमानत्वादग्निष्टोमसामेत्युच्यते इति सा० भा०। “ब्रह्मणो वा एष रसो यद्यज्ञायज्ञीयं स्तुवन्ति ब्रह्मणएव रसे यज्ञं प्रतिष्ठापयन्तीति” ताण्ड्यब्राह्मणम् तच्च साम यज्ञायज्ञीयशब्दे वक्ष्यते।

**अग्निष्ठ** पु० अग्नौ स्थातुमर्हति स्था—क षत्वम्। वह्नौ स्थिति योग्ये लौहमये कटाहादिपात्रे।

**अग्निसंस्कार** पु० अग्निना संस्कारः मन्त्रपूर्व्वकदाहः। विधानेन अग्निकृतदाहे। “अनाथस्याग्निसंस्कारं यः कुर्य्याद्वा दयान्वितः” इति काशी०।

**अग्निसङ्काश** त्रि० अग्निरिव सङ्काशते काश–दीप्तौ अच्। अग्नितुल्यवर्णे तत्तुल्यतेजस्के च।

**अग्निसम्भव** पु० अग्निरिव सम्भवति सम्+भू–अच्। अरण्यकुसुम्भे। ५त० स्वर्णे न०। अग्निसम्भूतमात्रे त्रि०।

**अग्निसहाय** पु० अग्निना सह अयते अय–अच् ३त०। वायौ, धूमे च। अग्निसहायधूमवद्वर्णवत्त्वात् शीघ्रगतित्वाच्च वनकपोते च।

**अग्निसाक्षिक** त्रि० अग्निःसाक्षी यत्र कप्। वह्निं साक्षीकृत्य कृते कर्म्मणि। “सख्यं कृत्वाग्निसाक्षिकमिति” रामा०।

**अग्निसार** न० अग्नौ सारो यस्य अत्यन्तानलोत्तापनेऽपि सारांशादहनात्। रसाञ्जने ६त०। वह्निसारे तु अस्त्री।

**अग्निस्तम्भ** पु० अग्निः दाहशक्तौ निरुध्यते अनेन। अग्निदाहनशक्तिनिरोधके मन्त्रे, औषधे च। ६त०। अग्नेर्दाहशक्तिप्रतिरोधे पु०।

**अग्निष्वा(स्वा)त्त** पु० ब०व० अग्नितः (आत्मीयविप्रकर्षणानलात्) सुष्ठु आत्तं ग्रहणं येषां आ–दा–क्त षत्वमिति बहवः। मरीचिपुत्रे पितृगणविशेषे। “अग्निष्वा(स्वा)त्ताः वर्हिषदः ऊष्मपा आज्यपास्तथेति” मनुः। तैत्तिरीयब्राह्मणे तु अन्यथा निरुक्तं यथा ‘अग्निष्वात्तानृतुमतो हवामहे। नराशंसे सोमपीथं य आशुः। ते नो अर्वन्तः सुहवा भवन्तु। शन्नो भवन्तु द्विपदे शं चतुष्पदे” इति “अग्निष्वात्ता अग्निष्वात्तनामकाः पितरः पितृविशेषाः। ते च चातुर्मास्यगतपितृयज्ञब्राह्मणे स्पष्टमभिहिताः, “ये वा अयज्वानो गृहमेधिनस्ते पितरोऽग्निष्वात्ता” इति। मनुष्यजन्मन्यग्निष्टोमादियागमकृत्वा स्मार्त्तकर्म्मनिष्ठाः सन्तो मृत्वा च पितृत्वं गताः। तानग्निष्वात्तान्” इति तद्भाष्ये माधवाचार्य्यः।

**अग्निहुत्** पु० अग्निं हुतवान् हु–क्विप् ६त०। कृताग्निहवने अग्निहोत्रिणि।

**अग्निहोत्र** न० अग्नये हूयतेऽत्र हु–त्र ४त०। मन्त्रकरणवह्निस्थापनपूर्व्वतदुद्देश्यकहोमे। अग्निहोत्रसम्बन्धित्वात् हविषि, वह्नौ पु०। काञ्चिदाख्यायिकामुपक्रम्य अग्निहोत्रशब्दनिरुक्तिविधानाद्युक्तं तैत्तिरीयब्राह्मणे “सोऽग्निरबिभेत् आहुतिभिर्वै मामाप्नोतीति स प्रजापतिं पुनः प्राविशत् तं प्रजापतिरब्रवीत् जायस्वेति सोऽब्रवीत् किं भागधेयमभिजनिष्य इति तुभ्यमेवेदं हूयाता इत्यब्रवीत् सएतद्भागधेयमभ्यजायत। यदग्निहोत्रम्” इति पुरा प्रजापतेस्तापं दृष्ट्वा पलायनादुपरतोऽग्निः प्रजापतेस्त्वपक्रम्यागत एव, ततः प्रजापतिस्तस्मिन्नग्नौ पूर्व्वोक्तं घृतं स्वाहाकारेण यामाहुतिं प्रथममजुहोत्। तदाहुतिसामर्थ्येन पुरुषमसृजत। तथा द्वितीयाद्याहुतिभिः अश्वादीनसृजत। ततः प्रजानां पुनरुत्पत्तेः स्वस्य प्रजापतित्वं सुस्थितम्। तदानीमग्निर्भीतोऽभूत्। तस्यायमभिप्रायः। प्रजापतिः पुनः पुनराहुतिभिरेव मां प्राप्नोति न तु भागं प्रयच्छति। तास्त्वाहुतीर्देवा एव गृह्णन्ति। तस्माद्भागरहितः सेवितुं न शक्नोमीति विचार्य्य पूर्व्ववत् पलायनमकृत्वा तस्मिन् प्रजापतावेव प्रविष्टः। स च प्रजायस्वेति पुनः पुनरग्निमब्रवीत् सचाग्निस्तदुदर एव स्थित्वा भागरहितोऽहं क्षुधितः सेवितुं न शक्नोमि भागो मेऽपेक्षितः। किं भागमभिलक्ष्याह-